# Ashrama Upanishad

# આશ્રમોપનિષત્

## Document Information

Text title : Ashrama Upanishad

File name : AshramopaniShat.itx

Category : upanishhat

Location : doc_upanishhat

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description/comments : Atharva Veda upanishad

Latest update : March 21, 2015

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 16, 2023

*sanskritdocuments.org*

# આશ્રમોપનિષત્

સર્વાશ્રમાઃ સમભવન્ યસ્માત્સોઽયં જનાર્દનઃ ।
કૈવલ્યાવાપ્તયે ભૂયાત્સદાચારરતાન્હિ તાન્ ॥ ૧॥

ૐ ભદ્રં કર્ણેભિઃ શ્રુણુયામ દેવાઃ ।
ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ।
સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાંસસ્તનૂભિર્વ્યશેમ દેવહિતં યદાયુઃ ।
સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ । સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ।
સ્વસ્તિ નસ્તાર્ક્ષ્યો અરિષ્ટનેમિઃ । સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ॥
ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

હરિઃ ૐ ॥ અથાતશ્ચત્વાર આશ્રમાઃ ષોડશભેદા ભવન્તિ ।
તત્ર બ્રહ્મશ્ચારિણશ્ચતુર્વિધા ભવન્તિ ગાયત્રો બ્રાહ્મણઃ
પ્રાજાપત્યો બૃહન્નિતિ । ય ઉપનયનાદૂર્ધ્વં ત્રિરાત્રમક્ષારલવણાશી
ગાયત્રીમન્ત્રે સ ગાયત્રઃ । યોઽષ્ટાચત્વારિંશદ્વર્ષાણિ વેદબ્રહ્મચર્યં
ચરેત્પ્રતિવેદં દ્વાદશ વા યાવદ્ગ્રહણાન્તં વા વેદસ્ય સ બ્રાહ્મણઃ ।
સ્વદાનિરત ઋતુકાલાભિગામી સદા પરદારવર્જી પ્રાજાપત્યઃ । અથવા
ચતુર્વિંશતિવર્ષાણિ ગુરુકુલવાસી બ્રાહ્મણોઽષ્ટાચત્વારિંશદ્વર્ષવાસી
ચ પ્રાજાપત્યઃ । આ પ્રાયણાદ્ગુરોરપરિત્યાગી નૈષ્ઠિકો બૃહન્નિતિ ॥ ૧॥

ગૃહસ્થા અપિ ચતુર્વિધા ભવન્તિ —વાર્તાકવૃત્તયઃ
શાલીનવૃત્તયો યાયાવરા ઘોરસન્ન્યાસિકાશ્ચેતિ । તત્ર વાર્તાકવૃત્તયઃ
કૃષિગોરક્ષવાણિજ્યમગર્હિતમુપયુઞ્જાનાઃ શતસંવત્સરાભિઃ
ક્રિયાભિર્યજન્ત આત્માનં પ્રાર્થયન્તે । શાલીનવૃત્તયો યજન્તો ન
યાજયન્તોઽધીયાના નાધ્યાપયન્તો દદતો ન પ્રતિગૃહ્ણન્તઃ શતસંવત્સરાભિઃ
ક્રિયાભિર્યજન્ત આત્માનં પ્રાર્થયન્તે । યાયાવરો યજન્તો યાજયન્તોઽધીયાના
અધ્યાપયન્તો દદતઃ પ્રતિગૃહ્ણન્તઃ શતસંવત્સરાભિઃ ક્રિયાભિર્યજન્ત
આત્માનં પ્રાર્થયન્તે । ઘોરસન્ન્યાસિકા ઉદ્ધૃતપરિપૂતાભિરદ્ભિઃ કાર્યં

કુર્વન્તઃ પ્રતિદિવસમાહૃતોઞ્છવૃત્તિમુપયુઞ્જાનાઃ શતસંવત્સરાભિઃ
ક્રિયાભિર્યજન્ત આત્માનં પ્રાર્થયન્તે ॥ ૨॥

વાનપ્રસ્થા અપિ ચતુર્વિધા ભવન્તિ વૈખાનસા
અકૃષ્ટપચ્યૌષધિવનસ્પતિભિર્ગ્રામબહિષ્કૃતાભિરગ્નિપરિચરણં
કૃત્વા પઞ્ચમહાયજ્ઞક્રિયાં નિર્વર્તયન્ત આત્માનં પ્રાર્થયન્તે ।
ઉદુમ્બરાઃ પ્રાતરુત્થાય યાં દિશમભિપ્રેક્ષન્તે તદાહૃતોદુમ્બરબદર-
નીવારશ્યામાકૈરગ્નિપરિચરણં કૃત્વા પઞ્ચમહાયજ્ઞક્રિયાં નિર્વર્તયન્ત
આત્માનં પ્રાર્થયન્તે । બાલખિલ્યા જટાધરાશ્ચીરચર્મવલ્કલપરિવૃતાઃ
કાર્તિક્યાં પૌર્ણમાસ્યાં પુષ્પફલમુત્સૃજન્તઃ શેષાનષ્ટૌ
માસાન્ વૃત્ત્યુપાર્જનં કૃત્વાઽગ્નિપરિચરણં કૃત્વા
પઞ્ચમહાયજ્ઞક્રિયાં નિર્વર્તયન્ત આત્માનં પ્રાર્થયન્તે । ફેનપા
ઉન્મત્તકાઃ શીર્ણપર્ણફલભોજિનો યત્ર યત્ર વસન્તોઽગ્નિપરિચરણં
કૃત્વા પઞ્ચમહાયજ્ઞક્રિયાં નિર્વર્તયન્ત આત્માનં પ્રાર્થયન્તે ॥ ૩॥

પરિવ્રાજકા અપિ ચતુર્વિધા ભવન્તિ—કુટીચરા
બહૂદકા હંસાઃ પરમહંસાશ્ચેતિ । તત્ર કુટીચરાઃ
સ્વપુત્રગૃહેષુ ભિક્ષાચર્યં ચરન્ત આત્માનં પ્રાર્થયન્તે ।
બહૂદકાસ્ત્રિદણ્ડકમણ્ડલુશિક્યપક્ષજલપવિત્રપાત્રપાદુકાસનશિખાયજ્ઞોપવીતકૌપીન-
કાષાયવેષધારિણઃ સાધુવૃત્તેષુ બ્રાહ્મણકુલેષુ ભૈક્ષાચર્યં
ચરન્ત આત્માનં પ્રાર્થયન્તે । હંસા એકદણ્ડધરાઃ શિખાવર્જિતા
યજ્ઞોપવીતધારિણઃ શિક્યકમણ્ડલુહસ્તા ગ્રામૈકરાત્રવાસિનો
નગરે તીર્થેષુ પઞ્ચરાત્રં વસન્ત એકરાત્રદ્વિરાત્રકૃચ્છ્ર-
ચાન્દ્રાયણાદિ ચરન્ત આત્માનં પ્રાર્થયન્તે । પરમહંસા
નદણ્ડધરા મુણ્ડાઃ કન્થાકૌપીનવાસસોઽવ્યક્તલિઙ્ગા
અવ્યક્તાચારા અનુન્મત્તા ઉન્મત્તવદાચરન્તસ્ત્રિદણ્ડ-
કમણ્ડલુશિક્યપક્ષજલપવિત્રપાત્રપાદુકાસનશિખાયજ્ઞોપવીતાનાં
ત્યાગિનઃ શૂન્યાગારદેવગૃહવાસિનો ન તેષાં ધર્મો નાધર્મો
ન ચાનૃતં સર્વંસહાઃ સર્વસમાઃ સમલોષ્ટાશ્મકાઞ્ચના
યથોપપન્નચાતુર્વર્ણ્યભૈક્ષાચર્યં ચરન્ત આત્માનં મોક્ષયન્ત આત્માનં
મોક્ષયન્ત ઇતિ ॥ ૪॥ ૐ તત્સદિત્યુપનિષત્ ॥

ૐ પૂર્ણમદઃ પૂર્ણમિદં પૂર્ણાત્પૂર્ણમુદચ્યતે ।
પૂર્ણસ્ય પૂર્ણમાદાય પૂર્ણમેવાવશિષ્યતે ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ઇત્યાથર્વણીયાશ્રમોપનિષત્સમાપ્તા ॥

Encoded and proofread by Sunder Hattangadi

*Ashrama Upanishad*

pdf was typeset on September 16, 2023

Please send corrections to *sanskrit@cheerful.com*